# गजः

1-मृगजातौ गजो गरिष्ठः।

2-तस्य पादाः स्तम्भाइव स्थूलाः।

3-तस्य कर्णौ शूर्पाविव विशालौ।

4-तस्य नेत्रे तावदत्यल्पे।

5- अथापि सोऽल्पान्यपि वस्तूनि द्रष्टुं शक्नोति।

6-भूमौ स्थितां सूचिकामपि स पश्यति गृह्णाति च।

7-गजस्य मुखेऽजगरवल्लम्बमानोऽवयवः शुण्डा।

8-वयं हस्तेन यत् कर्म कुर्मः तत् गजः शुण्डया करोति।

9-अत एव गजस्य शुण्डा ‘हस्तः’ इति ‘करः’ इति च व्यपदिश्यते।

10-तेन गजस्य ‘हस्ती’ ‘करी’ इति संज्ञे भवतः।

11-शुण्डैव गजस्य नासिका। तयैव श्वसिति गजः।

12-शुण्डाया अग्रे रन्ध्रमस्ति।

Sanskrit cümlelerin gramatik analizini yaparak Türkçeye çevirmek.